# कीटानुविद्धरत्नादिसाधारण्येन... इत्यादिश्लोकव्याख्या

सायन-दासः

साहित्यदर्पणकारेण विश्वनाथकविराजेन विरचिते साहित्यदर्पणाख्ये ग्रन्थे मम्मटकृतस्य काव्यलक्षणस्य परिष्करणसमये प्रस्तुतोऽयं श्लोकः उदाहरणत्वेन उदाहृतः तथाहि–

कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥ इति।

**अन्वयः–** दुष्टेषु अपि यत्र रसाद्यनुगमः स्फुटः (तत्र) कीटानुविद्धरत्नादिसाधारण्येन काव्यता मता इति।

**पदार्थः–** कीटेन अनुविद्धः कीटानुविद्धः। रत्नः आदौ येषां ते रत्नादयः। कीटानुविद्धाः रत्नादयः। कीटानुविद्धरत्नादिः। कीटानुविद्धरत्नादिना साधारण्यम् कीटानुविद्धरत्नादिसाधारण्यम्। रसः आदौ येषां ते रसादयः। रसादीनाम् अनुगमः रसाद्यनुगमः।

**अन्वयार्थः–** दुष्टेषु काव्येषु अपि यत्र स्फुटतया रसादीनाम् उपलब्धिः भवति, तत् काव्यम् इति मन्यन्ते काव्यतत्त्वविदः। तत्र दृष्टान्तः कीटानुविद्धरत्नादिः। यथा रत्नादयः कीटैः दष्टाः भवन्ति चेत् तेषु दोषः अस्ति इति उच्यते, नहि कीटदंशनं तस्य रत्नत्वं नाशयति। एवम् एव दोषाः काव्यस्य काव्यत्वं न नाशयन्ति। यथा दुष्टादुष्टरत्नयोः सामान्येन रत्नत्वव्यवहारः भवति, एवम् एव दोषवताम् अदोषवताम् अपि रसमयानां काव्यानां सामान्येन काव्यत्वव्यवहारः भवति।

**सामान्यार्थः–** दोषवत्सु अपि येषु वाक्येषु रस-रसाभास-भावादीनां प्रतीतिः स्पष्टा तेषु वाक्येषु बलवता दोषेण जातस्य वैरस्यस्य अतिशयम् अपि अभिभवन्ति रसादयः इति तात्पर्यम्। यथा कीटैः दष्टानां रत्नादीनां रत्नत्वव्यवहारः एव भवति, एवं दोषवताम् अपि रसमयानां वाक्यानां काव्यता स्वीकृता भवति काव्यतत्त्ववेत्तृभिः।

**व्याख्या–** मम्मटेन काव्यलक्षणे अदोषौ इति पदस्य ईषदर्थे नञः प्रयोगः इति चेत्, ईषद्दोषौ शब्दार्थौ काव्यम् इति अर्थः भवति। तथा उच्यते चेत् निर्दोषकाव्ये लक्षणस्य अव्याप्तिः। एवञ्च सति सम्भवे ईषद्दोषौ इति चेत्, एतद् अपि काव्यलक्षणे न वाच्यम्। यथा कीटानुवेधादयः रत्नस्य रत्नत्वं व्याहन्तुं न शक्नुवन्ति किन्तु उपादेयतारतम्यम् एव कर्तुं शक्नुवन्ति। तथैव काव्यस्य श्रुतिदुष्टादयः दोषाः काव्यत्वं व्याहन्तुं नैव शक्नुवन्ति। अतः रसमये वाक्ये दोषः अस्ति चेद् अपि तस्य काव्यत्वं व्याहतं न भवति।

**उदाहरणम्–** काव्यप्रकाशकारेण उत्तमध्वनिकाव्यस्य उदाहरणत्वेन किञ्चन पद्यम् उदाहृतम्।

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः
नेत्रे दूरम् अनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुम् इतो गतासि न पुनस्तस्याधमस्यान्तिकम्॥

इदं वाक्यं सखीं प्रति सख्याः वाक्यम्। एका सखी अपरस्याः सख्याः वार्ताम् आदाय नायकस्य निकटं गता। किन्तु तत्र गत्वा सा तेन नायकेन सम्भोगं कृतवती। तस्याः शरीरे सम्भोगचिह्नानि दृष्ट्वा यदा प्रथमसखी पृष्टवती तदा वञ्चिका सखी अवदत् यत् सा वाप्यां स्नानं कृतवती। प्रथमसखी तदा पृष्टवती, “दूति, तव स्तनतटात् चन्दनं च्युतम्। अधरस्य रागः मृष्टः। नेत्रयोः अञ्जनं नास्ति। तव शरीरं पुलकितम्। हे दूति त्वं बान्धवजनस्य मम अज्ञातपीडां दृष्ट्वा अपि त्वं स्नानार्थं वापीम् एव गता, न तु

मम पीडायाः अपनयनकारिणः नायकस्य समीपं गता।” एवम् उक्त्वा सखी वञ्चिकां सखीं निन्दति।

अस्मिन् पद्ये स्तनतटात् चन्दनच्युतिः, अधरात् ओष्ठरागस्य मार्जनं, नेत्रयोः अञ्जनस्य अपगमः, शरीरस्य पुलकः च स्नानस्य अपि चिह्नानि भवितुम् अर्हन्ति, नायकेन सह सम्भोगस्य अपि इति व्यङ्ग्येन प्रथमसखी दूतीभूतां सखीं भर्त्सयति। अपि च सखि इति सम्बोधनम् अकृत्वा दूति इति सम्बोधनेन तस्याः मिथ्यावाचनशीलत्वम् अपि ध्वन्यते। एवम् इदं काव्यम् उत्तमध्वनिकाव्यस्य उदाहरणं भवति। किन्तु प्रकृतश्लोके ‘नेत्रे दूरम् अनञ्जने’ इत्यत्र दूरम् इत्यनेन सह अनञ्जने इति पदे उपसर्जनीभूतेन नञा अन्वयः कर्तव्यः भवति। अतः अत्र काव्यगतः दोषः वर्तते। किन्तु दोषस्य सत्त्वे अपि इदम् उत्तमं काव्यं भवति।



[चित्रं कृत्रिममेधाद्वारा रचितम्]